विशेषरूपेण पुस्तकालयीयविधिमवलम्ब्यैवाध्ययनमत्र विहितमस्ति । अत्र च शेखरमनोरमाग्रन्थौ तथैव तदभिमतप्रतिपादपकव्याख्यानभूताग्रन्थाश्च प्रमुखसामग्रीत्वेन प्रयुक्ताः वर्तन्ते । अनुसन्धानेऽस्मिन् प्रातिपदिकार्थसूत्रविषये हिन्दीनेपाल्यादिभाषायां लिखिताः, अनूदिताश्च व्याकरणसम्बद्धा कारकार्थप्रतिपादकाश्च ग्रन्था अपि द्वितीयसामग्रीत्वेन गृहीतास्सन्ति।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

अत्र च प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रस्य सामन्यपरिचयप्रदर्शनपूर्वकं सूत्रस्य व्युत्पत्तिरपि प्रदर्शिता विद्यते। शेखरमनोरमाग्रन्थानुसारं दीक्षितनागेशयोः प्रातिपदिकार्थत्वविचारे यन्मतवैविध्यं वर्तते तस्य निरूपणम् तथा च द्रोणो व्रीहिरित्यत्र शाब्दबोधक्रमे द्वायोराचार्ययोः यदभिप्रायो विद्यते तस्यैव स्पष्टतया विवेचनम्, विश्लेषणमेवास्यानुसन्धानात्मकलेखस्य मूलं क्षेत्रं सीमा च वर्तते।

## सैद्धान्तिकपर्याधारः

वैयाकरणसिद्धान्तकौमुद्यां प्रथमखण्डे कारकप्रकरणस्य निरूपणं विद्यते। तथा च कारकत्वञ्च नाम करोति क्रियां निर्वतयति, सम्पादयति, अन्वयति वा कारकमिति भाष्यकारेणोक्तम्। एवञ्च क्रियाजनकत्वम्, क्रियान्वयित्वं वा कारकत्वमिति फलति । एतावता क्रियानिष्ठजन्यतानिरूपितजनकतावत्त्वं कारकत्वमिति सामान्यतः कारकस्यार्थो निष्पद्यते (उपाध्यायः, सन् १९६६, पृ. ७७४) । तथा च सर्वेषां कारकाणां स्वस्ववान्तरक्रियाद्वाराप्रधानक्रियानिष्पादकत्वमिति ज्ञेयम् । यद्यपि भगवता पाणिनिना अष्टाध्याय्याम् अनभिहिताधिकारानन्तरं कर्मणि द्वितीया इत्यादिकं कृतम्, उपान्ते प्रातिपदिकार्थसूत्रं तथैव अन्ते च सम्बोधने च इति (द्विवेदी, सन् २०१८, पृ. २४) तथापि भट्टोजिदीक्षितेन लौकिकीं सरणिमनुसृत्य प्रथमं तावद् प्रातिपदिकार्थेति सूत्रस्य उपन्यासो विहितः । तत्र च कारकप्रकरणे पठितानां सूत्राणां पृथग्वाक्यार्थबोधो न भवति, स्वौजस् इत्यादिना एकवाक्यतयैव तथापि सरलतया बोधनार्थं पृथग्वाक्यार्थबोधः कारकप्रकरणे क्रियते । अस्य कारकप्रकारणस्य व्याख्यानञ्च स्वयमेव मनोरमायां दीक्षितेत विहितमस्ति । तस्यापि पर्यालोचनं विधाय हरिदीक्षितेन शब्दरत्नटीकायामाचार्येण नागेशेन च लघुशब्देन्दुशेखरे च सम्यग्रूपेण गुणदोषानां विवेचनं कृतमस्ति । तेषामेव सिद्धान्तानामलोडनं कृत्वा समीक्षणमत्रोपन्यस्तमिति।

## विषयनिरूपणम्

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रे द्वे पदे वर्तेते। प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे इति सप्तम्यन्तमुद्देश्यवाचकं पदं विद्यते। प्रथमा इति प्रथमान्तं विधेयवाचकं पदमस्ति। प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च इति प्रातिपदिकार्थलिङ्गपरिमाणवचनानि तानि एव इति

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम् । मयूरव्यंसकादयश्च इति सूत्रेण नित्यतत्पुरुषसमासो विधीयते । एवपदेन सह विग्रहो भवति मात्रपदेन साकं समासः । ततः प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम्, तस्मिन् इति प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे इति । अविग्रहो, अस्वपदविग्रहो वा नित्यसमासः । (चतुर्वेद, सन् २०१२, पृ. २१६) द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायाद् मात्रपदस्य प्रत्येकं पदैः साकमन्वयः भवति । अन्वयस्तावत् पदानां न भवति अपि तु पदार्थयोरेव परस्परमन्वयः । तथापि शब्दार्थयोस्तादात्म्यमिति न्यायेन मात्रपदस्यापि वक्तुं शक्यते न क्षतिः । यद्यपि प्रातिपदिककार्थ–लिङ्ग–परिमाणादीनां मात्रपदार्थेऽन्वयस्तथापि मात्रपदार्थस्य प्रत्येकमन्वय इति व्यवहारः । यथा द्वन्द्वघटकीभूतानां पदार्थानां एकत्रान्वयः एव सहविवक्षा इति । मात्रशब्दस्य प्रत्येकं योगः इत्यत्र शब्दशब्दोपादानेनात्र मात्रच्प्रत्ययं वारयति । समासघटकीभूतस्य मात्रशब्दस्येत्यर्थो लभ्यते । तथा च प्रातिपदिकार्थमात्रे, लिङ्गमात्राद्याधिक्ये, परिमाणमात्रे, वचनमात्रे च प्रथमा भवतीति सूत्रार्थः । अत्र सूत्रे प्रातिपदिकार्थशब्देन सामान्यतया वैयाकरणनिकाये स्वार्थः, द्रव्यम्, लिङ्गम्, संङ्ख्या, कारकम् इति पञ्चानां बोधो भवति । स्वार्थः = प्रवृत्तिनिमित्तम्, द्रव्यम् = व्यक्तिः, अन्यत् सर्वं स्पष्टमेव ।

यत्र पृथग्लिङ्गग्रहणसामर्थ्यात्, लिङ्गग्रहणं व्यर्थं सद् अत्र कश्चित् विशिष्टः अर्थः प्रातिपदिकपदेन गृह्यते तच्च नियतोपस्थितकरूपम् इति विज्ञेयम् । अत्र प्रातिपदिकार्थपदं लाक्षणिकं नियतोपस्थितिकेऽर्थे तात्पर्यग्राहकञ्च लिङ्गग्रहणमिति दीक्षिताभिप्रायः । अत्र सूत्रघटकीभूतेन प्रातिपदिकार्थेन कश्चित् विशिष्टोऽर्थः गृह्यते न तु पञ्चकं प्रातिपदिकार्थः इति । प्रतिपदं लब्धुं योग्यं इति प्रातिपदिकम्, अर्थात् प्रतिपदम् उद्देश्यतया लब्धुं प्राप्तुमर्हतीति प्रातिपदिकम् । द्वितीयायाः उद्देश्यत्वमर्थः, ठक् प्रत्ययस्य योग्योऽर्थः । अर्थात् पदञ्चात्र प्रातिपदिकसंज्ञानिष्ठविधेयतानिरूपितोद्देश्यतावच्छेदकमर्थवत्परम् । यद्यपि प्रातिपदिकसंज्ञानिष्ठविधेयतानिरूपितोद्देश्यता चतुर्षु वर्तते – उद्देश्यतावच्छेदकं च धातुप्रत्ययप्रत्ययान्तभिन्नार्थवत्त्व–कृदन्ततदादित्व–तद्धितान्ततदादित्व–समासत्वैतदन्यतमरूपः तद्वन्त एते चत्वारः तेन प्रतिपदघटितपदशब्देन एतानि चत्वारि स्वीक्रियन्ते । प्रातिपदिकार्थनिष्ठशक्तिविषयीभूताः अर्थाः के इति ज्ञिज्ञासायाम् –

*"स्वार्थः द्रव्यञ्च लिङ्गं च सङ्ख्या कारकमेव च ।*
*अमी पञ्चैव नामार्थाः त्रयः केषाञ्चिदग्रिमा ॥"*

अत्र विद्यमानस्य प्रातिपदिकार्थपदस्य पारिभाषिकत्वमेव सर्वैः वैयाकरणैरङ्गीकृतम् । अत्र मानं तु सूत्रे लिङ्गग्रहणमस्ति । भट्टोजिदीक्षितमते प्रातिपदिकार्थस्यार्थः नियतोपस्थितिकः इति । नागेशमते तु प्रातिपदिकार्थपदेन प्रवृत्तिनिमित्तस्य, तदाश्रयस्य च बोधो भवति । प्रक्रियाकौमुदीकारादयस्तु सत्ता एव प्रातिपदिकार्थ इति उद्घोषयन्ति । यद्यप्यस्य विषये पातञ्जलमहाभाष्ये एतादृशं व्याख्यानं नैव समुपलभ्यते तथापि कैयटेन महाभाष्यस्य प्रदीपटीकायां स्पष्टतया प्रतिपादितम् । तत्र च टीकायां कैयटेन यमर्थं न व्यभिचरति स एव प्रातिपदिकार्थः प्रवृत्तिनिमित्तं तदाश्रयश्च इति तदेव प्रातिपदिकार्थः इति (त्रिपाठी, २०७०, पृष्ठ. २०५) तेन प्रथमांशं स्वीकृत्य दीक्षितस्य चिन्तनधारा प्रवाहिता । एवञ्च प्रवृत्तिनिमित्तः तदाश्रयः इति द्वितीयांशं स्वीकृत्य नागेशेन व्याख्या विहिता । अतः वैयाकरणनिकाये सर्वदा प्रातिपदिकार्थविषये मतद्वयं दृश्यत एव । स्वकीयामुद्योतटीकायामुक्तं नागेशेनान्वयव्यतिरेकाभ्यां यः अर्थः प्रातिपदिकार्थस्यावधारितः स एव प्रातिपदिकार्थः इति । प्रवृत्तिनिमित्तपदेनात्र वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारताश्रयत्वस्य बोधो भवति । यथा घटशब्दस्य घटत्वम् । पटस्य पटत्वमिति । तदाश्रयाश्च घटपटादयः । अतः प्रातिपदिकार्थपदेन घटघटत्वयोः बोधो जायते इति नागेशाशयः ।

प्रवृत्तिनिमित्ततदाश्रययोर्द्वयोरेव प्रातिपदिकार्थत्वेन स्वीकारादेव सूत्रेऽस्मिन् लिङ्गग्रहणस्य सार्थक्यमुपजायते । अन्यथा सूत्रे प्रातिपदिकवाच्यस्य प्रातिपदिकार्थपदेन ग्रहणे लिङ्गग्रहणवैयर्थ्यं स्पष्टमेव । यदि अत्रत्य लिङ्गग्रहणेन अनियतलिङ्गस्य न प्रातिपदिकवाच्यत्वं तदा नियतानियतलिङ्गपदसाधारण्येन स्वमोर्नपुंसकादिति सूत्रे नपुंसकपदप्रयोगोऽसङ्गतः स्यात् । तद्बलाद् यदि लिङ्गमात्रस्य वाच्यत्वं तदा प्रातिपदिकार्थत्वेनैव सिद्धे लिङ्गग्रहणं व्यर्थं भवेदिति । अतः लिङ्गमात्रस्य वाच्यत्वेऽप्यत्र सूत्रे प्रातिपदिकार्थपदेन द्वयोरेव ग्रहणाल्लिङ्गग्रहणं परिमाणग्रहणञ्च सार्थकं भवतीति । एतावता आचार्यनागेशमते प्रातिपदिकार्थस्य उदाहरणानि न भवन्ति कृष्णः श्रीः इत्यादयः । अपितु अलिङ्गाः, लिङ्गप्रवृत्तिनिमित्तकाश्चाव्ययपुमादयः भवन्ति । भाष्येऽपि प्रातिपदिकार्थे किमुदाहरणमिति प्रश्ने स्त्री, पुमान्नपुंसकमिति उक्तं महाभाष्यकारेण । कृष्णादिशब्देषु प्रवृत्तिनिमित्ततदाश्रयातिरिक्तपुंस्त्वादीनामपि भानाद् कृष्णादीनि लिङ्गाधिक्यस्योदाहरणानि भवन्ति । भट्टोजिदीक्षितमते यानि प्रातिपदिकार्थस्योदाहरणानि विद्यन्ते तानि नागेशमते लिङ्गाधिक्यस्योदाहरणानि भवन्ति । कृष्णादिशब्देषु प्रातिपदिकार्थातिरिक्तलिङ्गस्याप्याधिक्याद् लिङ्गग्रहणादेव भवति प्रथमा ।

परिमाणमात्रस्योदाहरणमपि दीक्षितेन सिद्धान्तकौमुद्यां द्रोणो व्रीहिः इत्युक्तम् । पदार्थस्य यदा विवेचनं भवति तदा शक्तं पदमिति स्वीकर्तव्यम् । यदा ज्ञानं भवति तत्र ज्ञाने च एक: विशेष्य:, एक: प्रकार: अपरश्च संसर्गोऽपि भासते इति । त्रिविधविषयविशिष्टो भवति ज्ञानं अत: विषयतापि त्रिविधा वेशेष्यतारूपा , प्रकारतारूपा, संसर्गतारूपा, इति । (यथा नीलो घट इत्यादौ **संसर्गवादिनये** - अभेदेनसम्बन्धेन नीलविशिष्टघट:, **प्रकारतावादिनये तु** - नीलाभिन्नो घट: इति शाब्दबोधो भवति । अत्र नीलपदार्थप्राकारतया, अभेदसंसर्गतया, घटश्च विशेष्यतया ज्ञाने भासते) तथैव अत्रापि द्रोणपदार्थः प्रकारतया परिच्छेद्यपरिच्छेदकभाव: संसर्गतया, एवं व्रीहे: विशेष्यतया भानं भवति यदि परिमाणार्थे सुप्रत्ययो विधीयते चेत् तेन भवति इष्टशाब्दबोध: **(द्रोणाभिन्नं यत्परिमाणं तद् परिच्छिन्नो व्रीहि: इति)** व्रीहि: इति द्रोण = परिमाणविशेष:, सु = परिमाणसमान्यः, व्रीहिः = व्रीहिपदार्थ: त्रिणि पदानि, त्रया: अर्था: । अत्र च ‘अस्त्रियाद्रोणमाढकौ’ इति नियमात् नियतलिङ्गत्वाभावात् तटशब्दवत् लिङ्गमात्राधिक्येऽपि प्रातिपदिकार्थे प्रथमा विधीयते चेत् इष्टशब्दबोधो नैव भवति । द्रोणशब्दात् यद्यपि लिङ्गमात्राधिक्येऽपि लिङ्गग्रहणसामर्थ्यात् प्रातिपदिकार्थे प्रथमा भवत्येव तथापि परिमाणग्रहणसामर्थ्यात् परिमाणार्थे प्रथमा विधीयते इष्टशाब्दबोधार्थमत्र । यदि प्रातिपदिकार्थे एव स्यात्तर्हि नामार्थ- नामर्थयोरभेद: स्यान्न तच्चेष्टम् । अत: परिमाणेऽर्थे प्रथमा विधीयते । प्रकृत्यर्थस्य द्रोणरूपस्य विशेषार्थस्य प्रत्ययार्थे सामान्यपरिणामे अभेदेनान्वय: (सामान्यविशेषयोरभेद:) द्रोणाभिन्नं यत्परिमाणं तत् परिच्छेदकम् तस्य परिच्छेद्ये मेये व्रीहौ परिच्छेद्यपरिच्छेदकभावसंसर्गेणान्वय: अत भवत्यत्र इष्टशाब्दबोध: । द्रोणशब्दात् यदि प्रातिपदिकार्थे प्रत्ययो विधीयते चेत् तेन शाब्दबोधकाले संगर्गविधया अभेदस्य भानं भवति तच्च नेष्टम् । अत: परिमाणेऽर्थे क्रियते चेत् तत्र संसर्गविधया परिच्छेद्यपरिच्छेदभावस्य भानं भवति तच्चेष्टम् । यतो हि द्रोण: परिच्छेदक: व्रीहिश्च परिच्छेद्य उभयो: भेदस्पष्ट एव वर्तते । **लक्ष्मीटीकाकार:** द्रोणो व्रीहि: इत्यत्र प्रातिपदिकार्थे प्रथमा तत: अभेद:, द्रोणपदस्य द्रोण, सु प्रातिपदिकार्थ:, व्रीहि नामार्थ: इति । **कौमुदीमूलार्थविद्योतिनीटीकायान्तु** - यदि घटात् प्रातिपदिकार्थे सु स्यात् तर्हि प्रातिपदिकार्थ: वाच्यार्थ:, तत्र प्रातिपदिकार्थत्वेन प्रातिपदिकार्थस्य वा घटत्वेन घटस्य इति विकल्प्य प्रथमाया: विशिष्टार्थाभाव: उक्त:, अत्र यमर्थं प्रकृति: वदति तममेवार्थं प्रत्ययमनुवदति इति चेत् सोऽपि नामार्थ एव । भवत्येव नामार्थेनाभेद: । यदि द्रोणशब्दात् प्रातिपदिकार्थे एव क्रियते चेत् सुप्रत्यय: द्योतक: एव तस्य कश्चिद् भिन्नार्थो नास्ति, कृते च परिमाणग्रहणे परिमाणेऽर्थे सु तत: भवति प्रकृत्यर्थप्रत्ययार्थयोरभेद:, न तु नामार्थप्रत्ययार्थयोरिति ।

## नामार्थयोरभेद :

नाम्न: अर्थौ नामार्थौ तयो: नामार्थयो: (एकस्य प्रातिपदिकस्य द्वौ अर्थौ) अथवा नाम्नो: अर्थौ तयो: नामार्थयो: उत वा नाम्न: अर्थ नामार्थ:, नामार्थश्च नामार्थश्च नामार्थौ तयो: नामार्थयो: कतम: समास: इष्ट: ? न प्रथम: यदि नाम्न: अर्थौ तयोरभेद यदि क्रियते चेत् - नाम = सुबन्तं यथा पुष्पवन्त इति तदर्थत्वं च तज्जन्यप्रतीतिविशेष्यत्वम् इति यथा पुष्पवन्त इति नाम्न: अर्थद्वयस्योपस्थितिर्भवति तयो: दिवाकरनिशाकरयोरभेदापत्ति: अत: न प्रथम: समास: । द्वितीयोऽपि न यदि नाम्नो: अर्थौ तयो: क्रियते चेत् (नामद्वयस्यार्थद्वयस्य) वृतौ एकत्वसङ्ख्याया: यत्नं विना भानं भवति चेत् पुन: द्विवचनान्तेन समासासम्भवात् । गमकं चेत् द्विवचनान्तेनापि भवत्येव । यथा राज्ञो: राज्ञां वा पुरुष: इति न अपितु राज्ञ: पुरुष: इत्येव भवतीति । एतावता अत्र तृतीयो न्याय्य: तत्र नाम्म: अर्थ इति नामार्थ: नामार्थश्च नामार्थश्चेति एकशेष: नामार्थौ तयो: नामार्थयो: (षष्ठीतत्पुरुषानन्तरमेकशेष:) इति यथा नीलोत्पलम् इत्यत्र नीलपदोपस्थाप्य नीलनामार्थस्य उत्पलपदोपस्थाप्योत्पलपदार्थस्य च अभेदो भवति इति ।

## अस्य न्यायस्य व्यभिचार: वारणञ्च ।

यथा अषष्ठ्यर्थबहुव्रीहौ अत्र घटकीभूतं षष्ठीपदं सप्तम्या: अपि बोधकम् । षष्ठ्यर्थ-सप्तम्यर्थबहुव्रीहौ नास्ति व्यभिचार: इति यथा पीतम् अम्बरं यस्य इति षष्ठ्यर्थबहुव्रीहौ पीतनामार्थस्य अम्बरनामार्थेन सह अभेदान्वयो भवत्येव तेन पीताभिन्नाम्बरसम्बन्धी पुरुष: इति । एवं सप्तम्यामपि विराभिन्नपुरुषाधिकरणं ग्राम: इति बोध: । अत्र उभयत्र न्यायस्य व्यभिचारो नास्ति । षष्ठ्यर्थ-सप्तम्यार्थातिरिक्त बहुव्रीहौ तु यथा प्राप्तोदको ग्राम: इत्यादौ तु प्राप्तम् उदकम् यम् (अत्र द्वितीयार्थकर्मपदार्थ: अन्यपदार्थ:) इति प्राप्तोदक: अत्र (प्राप्तम् उदकं यम्) प्रपूर्वकाद् आप्धातो: कर्तरि क्तप्रत्यय: तेन कर्तुरुक्तत्वात् उदकमित्यत्र प्रथमा, कर्मणश्चानुक्तत्वात् यम् इति द्वितीया स च बहुव्रीहौ अन्यपदार्थ: । एवञ्च उदककर्तृकप्राप्तिकर्म ग्राम: इति बोध:, अत्र समासेन कर्मण उक्तत्वाद् न द्वितीया भवति । अत्र उदकं प्राप्तमिति नामद्वयं तथा च अत्र उदकनामार्थस्य स्वनिष्ठकर्तृत्वनिरूपकत्वसम्बन्धेन (न्यायमते) प्राप्तौ अन्वय:, प्राप्तेश्च कर्मत्वसंसर्गेण ग्रामेऽन्वय: अत अत्र द्वयो: नामार्थयो: नाभदेनान्वय: अपितु भेदेन (क्रियाकर्तृभावसम्बन्धेन वा वैयाकरणनये) अन्वय: अत: व्युत्पत्ते: व्यभिचार : । इति व्यपेक्षावादीनां प्रश्न: । यथा राज्ञ: पुरुष: इति नामार्थद्वयस्य कथमपि अभेदान्वयो न सम्भवति तथैवात्रापि सत्यपि नामार्थद्वये न संभवति अभेदान्वय: । अत: अस्य न्यायस्य व्यभिचाराद् द्रोणो व्रीहिरित्यत्रापि भेदान्वय भवत्येव तस्य कृते (पारिछेद्यपरिच्छेदकभावेन) पुन: परिमाणार्थे प्रथमा विधानं व्यर्थमिव प्रतिभाति इति आशय: ।

व्यपेक्षावादिनां नये - “पृथक् पृथक् पदै: पृथक् पृथक् अर्था: उपस्थाप्यन्ते, पश्चाद् आकाङ्क्षायोग्यतादिवशात् पदानामन्वयो भविष्यति यथा वाक्ये तथैव समासे” । इति व्यपेक्षावादं स्वीकृत्य प्रश्न: समाधानं वैयाकरणनये न तथा सत्यपि वाक्ये तथात्वे समासे न तथा । प्राप्तोदकमित्यादौ व्युत्पत्ते: विषयता नास्ति अत: न व्यभिचार: । यतो हि युत्पत्तिस्तावद् विभिन्नपदोपस्थितिविषया समासे भिन्नभिन्नपदानाम् उपस्थितिरेव नास्ति । समासे एक एव विशिष्टार्थस्य भानं न पदद्वयम् । अत: न व्यभिचार: पक्षान्तरमादाय दूषणदानं नोचोतिम् । एतावता द्रोण: इत्यत्र प्रातिपदिकार्थे विधीयते चेत् अभेदान्वयापत्ति: । वैयाकरणनये तु न क्षति: समासे एकार्थीभावाङ्गीकारान्नात्र पदार्थद्वयस्योपस्थिति: अपितु विशिष्टार्थस्य एकस्य प्रतीति: (नात्र पदार्थद्वयस्योस्थिति:) न मध्ये भेदेन अन्वयस्यापेक्षा अपितु समुदायात् (प्राप्तोदक:) एकोपस्थितिविषय: उदककर्तृकप्राप्तिकर्मक: ग्राम: इति । “पृथक् पृथक् अर्थोपस्थापकानां पदानां एकपदोपस्थितिविषयत्वमेकार्थीभावत्वम् ”

अस्तु तावत् समासे एकार्थिभावाभ्युपगमान्न क्षति: इति प्रतिपादितम् । पुन: घटश्च इत्यत्र व्यभिचरितोऽयं न्याय: । तत्र तावद् एकनामार्थ: घट इति द्वितीयो नामार्थ च इति तथा नामार्थद्वयस्य विद्यमानत्वाद् अभेदान्वयोऽपेक्षित: किन्तु न भवति अत्राभेदान्वय अत: न्यायस्य व्यभिचार: स्पष्ट एव । घटश्च इत्यत्र घटपदेन घटरूपस्यार्थस्य उपस्थिति:, चेति नामार्थेन समुच्चयस्योपस्थिति: अत्र नामार्थद्वयस्याभेदान्वयोऽपेक्षित: न्यायबलात् । समुच्चये तु घटनिरूपितत्वसम्बन्धेनऽन्वयो भवति, तेन दृश्यते अत्र न्यायस्य व्यभिचार: । अत्र विचारणीयम् यदस्ति घटस्य समुच्चयेऽन्वय: अहोस्वित् समुच्चयस्य घटेऽन्वय: शब्दरत्नकारस्तु घटश्च इत्यत्र समुच्चयस्य घटेऽन्वय: अवयवावयविभावेन भेदसम्बन्धेन अन्वय: समुच्चयविशिष्टो घट: इति बोध: । प्रथमपक्षे घटस्य निरूपितत्वेन अन्वयो भवति तथा सति घटविशिष्टसमुच्चय: एवं भवति । न्यायस्य व्यभिभार स्पष्ट एव । शब्दिका: निपातानां द्योतकत्वं स्वीकुर्वन्ति, द्योतकत्वं नाम **"स्वसमभिव्याहृतपदनिष्ठवृत्ति उद्बोधकत्वम्"** (मिश्रः, सन् २००६, पृ. ८९) निपातत्वावच्छिन्ननिपातानां द्योतकत्वम् इति शाब्दिका: । घटे घटत्वावच्छिन्नघटनिरूपिता एका शक्ति:, तथैव चेतिनिपातसमभिव्याहारे समुच्चयविशिष्टघटनिरूपिताऽपरा शक्ति: एतावता अत्रापि अस्माकं नये घटनामार्थचनामार्थयो: पृथगुपस्थितिरेव नास्ति न क्षति:। वैयाकरणनये प्रकृतिप्रत्ययार्थयोरभेदान्वयो दुर्लभ: । यद्यपि प्राचीना: ग्रामं गच्छति इत्यादौ ग्राम इति प्रकृते: अम् इति प्रत्ययार्थस्य अभेदान्वयं कुर्वन्ति यथा ग्रामाभिन्नमाश्रय: तथापि नव्याः न तथा स्वीकुर्वन्ति । अत: अत्रापि परिमाणाधिक्ये प्रथमा इति पक्षं स्वीकृत्य यद् भवद्भि: प्रकृत्यर्थविशेषपरिमाणस्य प्रत्ययार्थसमान्यपरिमाणेन यद् अभेदान्वयो विहित: तच्चेष्टन्न । प्रकृति-प्रत्ययार्थयोरभेदान्वय: वैयाकरणनिकायेऽप्रसिद्ध: इति पूर्वपक्षिणामाशय: ।

प्रसिद्धस्थलं दर्शयति देवतार्थकतद्धितादौ दृष्टत्वात् । इति अर्थात् इन्द्र: देवता अस्य इति सास्य देवता इति अण् प्रत्यय:, इद्र: = इन्द्रदेवता, अण् = देवताविशिष्टद्रव्यम्, अत्र अण्प्रत्ययार्थैकदेशे देवतायां प्रकृते: अभेदान्वयो भवति, इन्द्राभिन्नदेवतासम्बन्धि द्रव्यम् इति दृश्यते एव प्रकृत्यर्थप्रत्ययार्थयोरभेदान्वय: । यदि विशिष्टे शक्ति: स्वीक्रियते चेत् तत्र पदार्थैकदेशान्वयापत्ति: अत: अण्प्रत्ययस्य खण्डश: शक्तिद्वयम् देवता, द्रव्यञ्च अत: द्वयमपि पदार्थ: न क्षति: ।

## अभेदस्तु न संसर्ग:

सम्बन्धो हि सम्बन्धिभ्यां भिन्न:द्विष्ठ: विशिष्टबुद्धिनियामकश्च, अभेदस्तावत् द्विष्ठो न भवति नीलो घट: इत्यत्र तयोर्भेदो नास्ति उभयोस्तादात्म्यात् एकनिष्ठ: एव न द्विष्ठ:, अत: सम्बन्धघटकसम्बन्धिभिन्नत्वम् अभेदे नास्ति । तथा अभेदस्य संगर्गत्वं कथं कथ्यते ? यदि अभेदस्य संसर्गत्वं न स्यात् तर्हि राहो: शिर: इत्यत्र कथं षष्ठी विहिता भाष्यकारेण । राहुशिरसो: कश्चिद् भेद एव नास्ति । य: राहु: सैव शिर: यत्शिर: सैव राहु: अत: अभेदस्य संसर्गत्वं स्वीकर्तव्यमेव ।

राहो: शिर:, इत्यत्र भाष्यकारेण औपाधिकभेदमादाय षष्ठी विहिता, अभेदेऽपि भेदस्य आरोपो विहित:, अत्र अवयवावयविभाव: काल्पनिक: एव । अर्थात् एतत्क्षणावच्छिन्नो राहु:, एतत्क्षणावच्छिन्नं शिर: अर्थात् दिवसाद्यवच्छिन्नो राहु:, घट्यवच्छिन्नं शिर:, एतादृशं भेदं स्वीकृत्य दिवसात्मककालावच्छिन्नो राहु: अवयवी, घट्याद्यवच्छिन्नं शिर: अवयव: एतत् सर्वं कल्पनां विधाय षष्ठी विहिता भाष्यकृता । अभेदस्य तात्पर्यं तु इत्थमस्ति

**इतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभाव:** यथा राज्ञ: पुरुष: इत्यत्र राजा प्रकार:, राजनि = प्रकारता, पुरुषे = विशेष्यता, एवञ्च तयो: नियामकसम्बन्धश्च स्वस्वामिभाव: एवञ्च विशेष्य-विषेषणभावेतर स्वस्वामिभावसम्बन्धावच्छिन्ना वा स्वत्वसम्बन्धावच्छिन्ना वर्तते ।

(यथा स्वत्वसम्बन्धावच्छिन्ना राजत्वावच्छिन्ना राजनिष्ठविशेषणतानिरूपितपुरुषत्वावच्छिन्ना पुरुषनिष्ठविशेष्यतावत्) वर्तते अत: नाभेद: । विशेष्यता किञ्चिद्धर्मावच्छिन्ना एवं निरवच्छिनाऽपि भवति किन्तु सम्बन्धावच्छिन्ना तु न भवति । प्रकारता एव किञ्चिद् सम्बन्धावच्छिन्ना भवति । यथा घट: इति घटत्वविशिष्टघट: इत्यत्र घटनिष्ठविशेष्यता निरवच्छिना, नीलो घट: इत्यत्र तु घटनिष्ठा विशेष्यता सावच्छिन्ना एव । नीलो घट: इत्यत्र नीलत्वावच्छिन्ना या नीलनिष्ठा प्रकारता सा नीलत्वावच्छिनास्ति किन्तु सम्बन्धावच्छिन्ना नास्ति यतो हि अत्र प्रकारताविशेष्यतावच्छेदकयो: यो भेद: नीलत्व-घटत्वरूप स एव भेदधर्मिणि आरोप:, अत: आरोपितभेदमादाय विशेषणविशेष्यभाव: । विशेषणविशेष्यभावातिरिक्तः कश्चित् सम्बन्धो नास्ति अत: अभेद: एवञ्च इरतसम्बन्धानवच्छिन्नविशेषणविशेष्यभाव एव अभेद इति ।

एतावता समासे एका एव विशिष्टा शक्तिरिति । व्यपेक्षावादिनये उदकपदेन उदकपदार्थस्य एवं च प्राप्तपदेन प्राप्तिरूपाया: क्रियाया: उपस्थिति:, उदकनामार्थस्य स्वनिष्ठकर्तृत्वरूपभेदसम्बन्धेन प्राप्तिरूपक्रियायां तस्याश्च कर्मत्वेन रूपेण ग्रामेऽन्वय: एवञ्च उदककर्तृकप्राप्तिकर्मक: ग्राम: इति बोध: अस्त्येव अत्र व्युत्पत्ते: विरोध: ।

व्यपेक्षावादिन: समादधति = पाचक: देवदत्त: इत्यादौ कृदन्तेषु, तद्धितान्तेषु च प्रत्ययार्थस्य प्राधान्यं प्रकृत्यर्थस्य विशेषणत्वम् । पाचक: पाककर्ता, उपगु: उपगोरपत्यम् । पचति इत्याद्याख्तातस्थले तु प्रकृतिप्रत्ययार्थयो: सहार्थं ब्रूत: प्रत्ययार्थस्यैव प्राधान्यमित्यस्यापवादभूतेन 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति न्यायेन प्रकृत्यर्थस्य धात्वर्थस्य प्राधान्यं प्रत्ययार्थस्य विशेषणत्वम् । प्राचां मते धात्वर्थस्य व्यापारस्यैव प्राधान्यं, नवीनमते कदाचित् फलस्य, कदाचित् व्यापारस्य वा प्राधान्यम् । अर्थात् पचति इत्यत्र प्रत्ययार्थस्य विशेषणत्वं प्रकृत्यर्थस्य फलस्य व्यापारस्य वा प्राधान्यम् । एतावता प्राप्तमपि कृदन्तप्रातिपदिकं तदपि प्रत्ययार्थप्राधान्येन भाव्यम् । प्राप्तम् प्राप्तिकर्ता । व्यपेक्षावादिनामाक्षेप: पचति इत्यत्र तथा प्रत्ययार्थप्राधान्यस्य त्याग: तद्वद् अत्रापि प्राप्तमित्यत्रापि प्रत्ययार्थस्य प्राधान्यस्य त्यागो भवेद् । पचतिवद् प्राप्तमित्यत्रापि कर्तृत्वरूपस्य क्तप्रत्ययस्य वृत्तित्वसंसर्गेण प्राप्तिक्रियायां भवेदन्वय: एवञ्च कर्तृवृत्तिप्राप्ति: इति । एवं रूपेण प्राप्तमिति प्राप्तिकर्ता न अपितु कर्तृवृत्तिप्राप्ति: (विशेष्यविशेषणस्य वैपरीत्येन) उदकनामार्थस्य प्राप्तनामार्थैकदेशे कर्तृरूपेऽर्थेऽभेदेनान्वय: तथा च उदकाभिन्नकर्तृवृत्तिप्राप्ति: तस्य कर्मत्वेन संसर्गेण ग्रामेऽन्वय:, न व्यभिचार: तेन एकार्थीभावाभ्युपगमो व्यर्थ: तार्किकाणामाशय: । एतावता सत्यम् किन्तु 'पदार्थ: पदार्थेनैवान्वेति न तु पदार्थैकदेशेन' इति न्यायस्य सत्वात् बाधोऽयं पन्था: । यतो हि पदार्थत्वं नाम समान्यतया पदनिष्ठशक्तिविषयत्वं भवति यथा घटपदनिष्ठशक्तिबिषयता यथा घट: तथैव घटत्वञ्च । किन्तु शाब्दबोधकाले घटपदनिष्ठशक्तिबिषयत्वं एवं न स्वीक्रियते अपितु पदजन्यप्रतीतिविशेष्यत्वं पदार्थत्वम् इति पदार्थैकदेशत्वं तु पदजन्यप्रतीतिप्रकारकत्वम् । यथा घटपदजन्या घटत्वविशिष्टघटपदस्य उपस्थिति: तत्र पदार्थो घट:, पदार्थैकदेशस्तु घटत्वं प्रकारतया उपस्थितत्वाद् । गौर्नित्या, नित्यो घट: इत्याद्यर्थमअयं न्यायो कल्पित: प्रामाणिकश्च । अन्यथापि पदार्थैकदेशे घटत्वे, गोत्वे वा अन्वये सति एतादृशवाक्यानामपि प्रामाण्यापत्ति:, नित्यपदार्थस्य घटेऽन्वयस्तु बाधितमेव । अत: व्यपेक्षावादिभि: एतादृशीं कल्पनां कृत्वा उदकपदार्थस्य प्राप्तपदार्थैकदेशे कर्तृत्वेऽन्वय: कर्तुं नैव शक्यते । नामार्थनामार्थयोरभेद: इत्यनेन सह पदार्थ: पदार्थेनैव इत्यस्य सम्बन्ध: । तथा च न्यायस्वरूपं भवति **"नामजन्यप्रतीतिविशेष्ययोरेव अभेदान्वय:, न तु नामजन्यप्रतीतिविशेष्यप्रकारयो:"** । कर्तृवृत्तिप्राप्ति: इत्यत्र पदार्थ: प्राप्ति:, पदार्थैकदेशस्तु कर्ता । पदार्थे च प्राप्तिरूपक्रियायाम् उदकपदार्थस्य अभेदान्वयो बाधित:। यत्र यत्र बोध: प्रामाणिक: तत्र तत्रैव पदार्थैकदेशेऽपि अन्वयो भवति वेदाः प्रमाणम् इत्यादौ न सर्वत्र । अत्र यद् अवधेयम् अत्र व्यभिचारः प्रदर्शनं प्राचां वैयाकरणानां मते एव । ते खलु आचार्या: "वृत्तिविग्रहयो: समानार्थकत्वम्" इति नियमस्य

त्यागं कुर्वन्ति। तेषां मते यथा विग्रहवाक्यात् प्राप्तम् उदकं यम् अस्मात् **यत्कर्मकप्राप्तिकर्तृ उदकम्** इति बोध:, समासे प्राप्तोदकम् इत्यत्र तु 'उदककर्तृकप्राप्तिकर्मीभूतो ग्राम:'। विग्रहवाक्ये प्राप्तिपदार्थस्य उदकपदार्थेन साकं कर्तृत्वेन अन्वय: अत: व्यभिचार:, समासेऽपि उदकपदार्थस्य कर्तृत्वेन अन्वय: अत व्यभिचार:।

नागेशमते तु वृत्तिविग्रहयो: समानार्थकत्वमिति सिद्धान्त:, तेषां मते प्राप्तोदकम् इत्यत्र प्राप्तिकर्त्रभिन्नं यदुदकं तत् कर्म ग्राम:, इति भवति प्राप्तिनामार्थस्य उदकनामार्थेन सह अभेदान्वय: न व्युत्पत्ते: व्यभिचार: व्यपेक्षावादेऽपि। वृत्तिविग्रहयो: समानार्थकत्वं स्वीकर्तव्यं यतो हि बहुव्रीहौ वृत्तिविग्रहयो: एकधर्मिबोधकत्वस्य सत्वे एव सामानाधिकरण्यं न तु विभिन्नधर्मिकबोधे इति। अत्र यद्यपि प्राप्तिकर्त्रभिन्नोदककर्म इत्यत्र उदकपदार्थे कर्तृतानिरूपकत्वस्य बाध:, कर्तृतानिरूपकत्वं प्राप्तिक्रियायां वर्तते, तथापि विशेषणीभूतक्रियायां विद्यमानस्य कर्तृतानिरूपकत्वस्य विशेष्ये उदके आरोप्यते। "सविशेषे विधिनिषेधौ विशिष्ये बाधे सति विशेषणांशे उपसंक्रामत:"। शिखी ध्वस्त: इत्यत्र यथा ध्वंसप्रतियोगित्वस्य शिखीपुरुषे बाध:, तेन विशेषणीभूता या शिखा तत्र ध्वंसप्रतियोगित्वमस्ति तस्य आरोपो यथा भवति विशिष्टे। तद्वदत्रापि यद्यपि कर्तृतानिरूपकत्वं प्राप्तिक्रियायां वर्तते तथापि तस्य आरोपो भवति उदकपदार्थे न क्षति:। एतावता अत्र व्यभिचारशंका काकदन्तवद् व्यर्था इति। तेन नागेशमते कथमपि व्यभिचारो नास्ति। व्यभिचारस्तु प्राचां मते एव। वस्तुतस्तु यथा पञ्चकं प्रातिपदिकार्था:, तथैव पञ्चकं धात्वर्था: इति कर्तृ/ कर्म, संख्या, काल:, फल, व्यापार: एते सर्वे धातोरेवार्था: तिङ्स्तु द्योतक एव। यथा अजा इत्यत्र अज, अजत्व, स्त्रीत्वरूपाः शक्तयः, अजाशब्दे एव टाप्प्रत्ययस्तु द्योतक एव।

**"य: प्रत्ययार्थ: द्योत्यार्थो भवति स सर्वदा प्राकारतया एव भासते, यस्तावत् प्रत्ययार्थ: वाच्यार्थो भवति स सर्वदा विशेष्यतया एव भासते"।** एवञ्च प्राप्तमित्यत्र क्तप्रत्यय: वाचक एव न द्योतक: तेन प्रत्ययार्थस्यैव प्रामाण्यम्।

यदि प्रत्ययानां तेषु तेषु अर्थेषु शक्तिस्वीक्रियते चेत् शक्ततावच्छेदके गौरवम्। एतावता यथा तिङन्तस्थले प्रत्ययार्थप्राधान्यस्य त्याग:, तथैव कृदन्तस्थलेऽपि प्रत्ययार्थप्राधान्यस्य त्याग: इति न, यतो हि तत्र तिङन्तस्थले द्योतकत्वाभ्युपगमात्। योऽर्थ: वृत्तिघटकेन पदेन पदैकदेशेन वा न लभ्यते स अन्यपदार्थ:। व्युत्पत्तिस्तावत् विभिन्नपदोपस्थितिविषया, समासे तु एका एव विशिष्टा शक्ति: न क्षति:। राज्ञ: पुरुष: राजपुरुष: अत्र राजपदार्थपुरुषपदार्थयोस्तावत् द्वयो: नामार्थयो: स्वत्वसम्बन्धेन अन्वय:, स्वत्वञ्च भेदसम्बन्ध:। अत: अत्रापि व्यभिचार: इति, यदि पूर्वपदस्य राजसम्बन्धिनी लक्षणा क्रियते चेत् भवति यद्यपि राजसम्बन्ध्यभिन्नपुरुष: तथापि लक्षणायां किपमि प्रमाणं नास्ति। अत समासे एकार्थीभावाभ्युपगमात् न पृथगुपस्थितिर्भवति पदानां समस्तेन पदेन राजविशिष्टपुरुषस्यैवोपस्थिति न क्षति:। न्यायस्य विषय एव न। एतावता निश्चप्रचम् नामार्थयोरभेद इति न्यायस्य व्यभिचारो नास्तीति। ननु घटश्चेत्यादौ च एक: नामार्थ: समुच्चय: घट: इति द्वितीयो नामार्थ:, सुमुच्चयस्य चार्थस्य घटपदार्थे वृत्तित्वरूप–भेदसम्बन्धेन अन्वेति अत: पुन: नामार्थयोरभेद इति व्युत्पत्ते: विरोध: इति पूर्वपक्षी। अत्रापि चार्थस्य समुच्चयस्य घटेऽन्वय एव नास्ति। निपातानामपि द्योतकत्वाभ्युपगमात् समुच्चयविशिष्टो घट: एक एव विशिष्टार्थोपस्थिति: पृथगुपस्थितिरेव नास्तीति निपातानां विशेषणतया एव अन्वय:।

नैयायिकानां नये घटस्य समुच्चयरूपे चार्थे निरूपितत्वेन अन्वय:, घटनिरूपितसमुच्चय: इति वैयाकरणनये तु चार्थस्य विशेषणतया एवान्वय: समुच्चयवान् घट: इति। घटं पश्य पटश्च इत्यादावपि समुच्चयविशिष्टपट: पश्य इति बोध:। समुच्चयोऽपि घटपदवाच्य एव। तेन निपातानां द्योतकत्वमेवाङ्गीकार्यम्, तेन अनुभूयते सुखम् इत्यादौ सकर्मकत्वम्। एतद् अवगन्तव्यम् अर्थविशेषमादाय धातूनां सकर्मकत्वाकर्मकत्वं निर्णीयते। एकस्मिन् एव धातौ नाना:

शक्तय: लसन्ति । किन्तु सर्वासां शक्तीनाम् सहैव बोधस्तु न भवति । अनूपसर्गसमभिव्याहारे भूधातो: अनुभवानुकूलाशक्ति:, तद्रहिते च सत्तारूपा शक्ति: । उपसर्गा: हि धातूनां शक्तिम् उद्बोधयन्ति, उपसर्गभेदाद् धातूनामर्थभेद: । यदा अनुपदसामीप्यं तदा अनुभवानुकूलव्यापारवाचकत्वं भूधातौ । अनुभवस्तावत् विषयता सम्बन्धेन घटे, व्यापारस्तु समवायेन चैत्रे । व्यधिकरणत्वात् सकर्मकत्वमिति । सविशेषधातुमादाय तत्र फलतावच्छेदकसम्बन्ध: विषयता एव । नैयायिका: केषाञ्चित् निपातानां वाचकत्वं केषाञ्चिन्निपातानां द्योतकत्वं स्वीकुर्वन्ति । तच्च नेष्ट अर्धजरतीयन्यायस्य अस्वीकाराद् । एतावता निश्चितम् नामार्थयोरभेद इति न्यायस्य व्यभिचार एव नास्ति । अत: द्रोणो व्रीहिरित्यत्र न पादिपदिकार्थे अपितु परिमाणार्थे एव प्रथमा तेन भवति परिच्छेद्यपरिच्छेदकरूपेण भेदसंसर्गेण अन्वय: न क्षति: ।

एवञ्च प्रकृत्यर्थ–प्रत्यायार्थयोरभेदान्वय: दुर्लभ इति चेत् पूर्वमुक्तं द्रष्टव्यम् । ऐन्द्रमित्यादौ इन्द्रपदार्थ: देवताविशेष:, अण्प्रत्ययार्थ: देवतासम्बन्धिद्रव्यम् । इन्द्राभिन्नदेवता तस्योद्देश्यविधेयभावेन द्रव्येऽन्वय: । तथा च इन्द्राभिन्नदेवतोद्देश्यं द्रव्यमिति बोध: । यदि पादार्थैकदेशे अन्वयो दुर्लभश्चेत् अण् प्रत्ययस्य खण्डश: शक्तिद्वयम् । देवतायां द्रव्ये च । तथा च देवता अपि पदार्थ: द्रव्यमपि पदार्थ: न क्षति: । तेन भवत्येव प्रकृतिप्रत्यार्थयोरभेद: इति ।

अस्तु तावद् अस्माकं नये तु यथा समासो वृत्ति: तथैव तद्धितोऽपि वृत्ति: अत: अत्रापि ऐन्द्रमिति पदेन न पृथगुपस्थिति अपि विशिष्टस्यैकस्यैवार्थस्य प्रतीतिर्भवति इन्द्रदेवतासम्बन्धिद्रव्यमिति । प्रकृतिप्रत्ययार्थयो: पृथगुपस्थितिरेव नास्तीति न क्षति: । असति विशेषे विशेष्यविशेषणयो: समानवचनकत्वं सामानलिङ्गत्वं च न्याय्यम् (आचार्य:, २०७३, पृ. ४) । नील: घट: अस्ति । नीलं घटं आनय वा । न तु नील: घटं आनय । किन्तु यत्र विशेष्यविशेषणयो: भेदसम्बन्धेनान्वय: तत्र समानविभक्तिकत्वं नापेक्षितम् यथा राज्ञ: पुरुषमानय इत्यादि ।

द्रोणो व्रीहि: इत्यत्रापि परिच्छेद्य-परिच्छेदकभावेन भेदसम्बन्धेन अन्वय: अत: समानवचनकत्वं नापेक्षितम् तेन दीक्षितमते द्रोणो व्रीहिमानय इति आपत्तिर्भवति चेद् एतादृशाणां वाक्यानाम् अनभिधानादेव वारणीयम् । सर्पि: कुडवम् इत्यत्र तु कुडवाभिन्नं यत् परिमाणं तत्परिच्छिन्नं सर्पि: इति अत्र कुडवपरिमाणस्य सर्पि: पदार्थे अन्वयाद् षत्वप्राप्तिस्तद्वारणं तु व्यवस्थितविभाषया भवति । अत्र सूत्रे तिरसोऽन्य इति सूत्राद् अन्यतरस्यामित्यस्यानुवृत्तिर्भवति तत्तु व्यवस्थितविभाषा इति । (परिगणिते एव व्यवस्थितविभाषा इति न तस्य उपलक्षणत्वात् )

## खण्डनम्

यदि परिमाणार्थे प्रथमा विधीयते चेत् तिङ्समानाधिरणे प्रथमा (शास्त्री, सन् २०१६, पृ. ६७७) इति वार्तिकेण साकं विरोध: । यत्र तिङ्वाच्यकारकवाचित्वं भवति तत्रैव प्रथमा । यथा घट: अस्ति अत्र तिङ् = ति, तद्वाच्यं कारकं कर्तेति, तद्वाचित्वमेव घटपदोत्तर सुप्रत्ययस्य अर्थ: तेन प्रथमा । अत्र च तिङ्समानाधिकरणं स्पष्टमेव विद्यते । द्रोण: अस्ति इत्यत्र तथा नास्ति अत्र दीक्षितेन परिमाणार्थे सुविहित: अत: तङ्वाच्यकारकवाचित्वं नास्तीति तेन प्रथमा न । अत: प्रातिपदिकार्थे एव सुप्रत्ययो विधेय: । परिमाणग्रहणार्थ्यात् परिमाणस्याधिक्येऽपि स्वार्थे प्रथमा तेन द्रोणपदोत्तर प्रथमाया: प्रातिपदिकार्थत्वेन कर्ता अर्थ: तेन सामानाधिकरण्यमस्ति उभयो: न क्षति: । द्रोण–द्रोणत्व–पुंस्त्वातिरिक्तं परिमाणत्वेन परिमाणमपि अधिकं भासते द्रोणशब्दे तेन परिमाणग्रहणसामर्थ्यात् प्रथमा स्वार्थे इति हरिदीक्षित: । अन्यत् सर्वं शेरखरादिग्रन्थे तट्टीकासु च सम्यङ्निरूपणं विहितमस्ति तत्रैव द्रष्टव्यं भवतीति ।

## शक्यतावच्छेदकारोप एव लक्षणा

नागेशहरिदीक्षितादीनां मते तु प्रातिपदिकमात्रस्योदाहरणानि उच्चैः, नीचैः, एवञ्च लिङ्गप्रवृत्तिनिमित्तकाः शब्दाः स्त्री, पुमान्, नपुंसकम्, यहो हि एतेषां प्रवृत्तिनिमित्तमेव स्त्रीत्वादि, रामः, श्रीः, ज्ञानम्, इत्यादौ राम-रामत्वातिरिक्तं पुस्त्वादीनामपि बोधः तेन एते लिङगमात्रस्योदाहरणानि, द्रोणः इत्यत्र यथा पुंस्त्वं स्वरूपेणान्वेति विशेष्ये तद्वत् परिमाणत्वेन परिमाणपमि विशेष्यान्वयी अतः द्रोणशब्दात् प्रवृत्तिनिमित्त-तदाश्रयातिरिक्तस्य लिङ्गस्यापि अधिकतया भानं तेन न प्रातिपदिकार्थमात्रस्योदाहरणम्, एवञ्च लिङ्गापेक्षया अपि परिमाणत्वेन परिमाणस्यापि अधिक्येन भानाद् परिमाणग्रहणं कृतम्। तेन परिमाणस्यापि आधिक्येन भाने सत्यपि प्रातिपदिकार्थे प्रथमा। तेन द्रोणो व्रीहिरिति न कथमपि परिच्छेद्यपरिच्छेदकभावेनान्वयः उभयत्रप्रातिपदिकार्थत्वात्। द्रोणो व्रीहिरित्यादि प्रयोगास्तु सिंहो माणवकः इत्यादाविव लक्षणया उपपत्तिः, यथा सिंहशब्देन पशुत्वधर्मविशिष्टपशोर्बोधः, माणवकपदेन बालस्य बोधः, न कदापि माणवकः सिंहो भवति तथापि माणवके यत्किञ्चित् शौर्यकौर्यादिरूपसादृश्यवशात् तत्सदृशे लक्षणां विधाय व्यवहारो भवति। तथैव अत्रापि परिच्छेद्यपरिच्छेदकयोरैक्याभावाद् द्रोणशब्दस्य द्रोणपरिमिते लक्षणा विधीयते तेन भवति द्रोणपिरिमितो व्रीहिरिति।

अत्र का लक्षणा ? कथं भवति लक्षणा ? किं तस्याः स्वरूपं वैयाकरणनिकाये एतन्निरूप्यते। शाब्दिकानां नये मीमांसकानां च नये लौकिके वाक्ये तात्पर्यानुपपत्तिरेव लक्षणायाः बीजमिति। वैदिकवाक्ये च अन्वयानुपपत्तिरेव लक्षणायाः बीजमिति। तार्किकास्तावत् तात्पर्यानुपपत्तिरेव लक्षणेति उभयत्र। गंगायां घोषः इत्यत्र गंगापदस्य शक्यार्थो यो जलप्रवाहरूपोऽर्थः तेन साकं घोषस्य आधराधेयभावो नैव भवितुमर्हति। तेन गंगापदशक्यो यो जलप्रवाहः तस्य तटेन साकं यस्तावत् सामीप्यसम्बन्धः स एव लक्षणा। लक्षणायामर्थगतस्य सम्बन्धस्य शब्दे आरोप्यते यथा गंगापदशक्यो जलप्रवाहः, तस्य सम्बन्धः तटे वर्तते तत् गंगायामारोप्यते। अस्माकं नये तु लक्षणा न पृथक् शक्तिरस्ति अपितु अप्रसिद्धा शक्तिरेव लक्षणा। तत् स्वरूपञ्च शक्यतावच्छेदकारोप एव लक्षणा (मिश्रः, सन् २००६, पृ. २१)। यथा सिंहशब्दस्य सिंहोरूपोऽर्थः शक्यः, शक्यता च सिंहनिष्ठा, शक्यतावच्छेदकं च सिंहत्वं तस्य आरोपो माणवके तेन सिंहो माणवकः इति भवति। पशौ सिंहत्वस्य प्रमात्मकं ज्ञानम्, माणवके तु आरोपात्मकं ज्ञानम्। सर्वत्र न तावदारोप्यते यत्र खलु किञ्चिद्सादृश्यं लभ्यते तत्रैव आरोपः। अतः आरोपितप्रवृत्तिनिमित्तमादाय सिंहो माणवकः इति व्यवहारः। द्रोणो व्रीहिरित्यत्रापि आरोपितद्रोणत्ववान् व्रीहिरिति बोधः। अतः लक्षणा न पृथक्शक्तिरपितु आरोपितरूपा एव। सर्वे सर्वार्थवाचकाः इति न्यायात् सति तात्पर्ये सिंहशब्दोऽपि माणबकं बोधयति। द्रोणशब्दोऽपि परिच्छिन्नं द्रव्यं बोधयति। न एकस्य शब्दस्य नानार्थकतापत्तिः **"वस्तुतस्तु यावन्तः अर्थाः, तावन्तः शब्दाः किञ्च आनुपूर्वी ऐक्यात् एकोऽपि शब्दः नानार्थकः व्यवह्रियते वस्तुतः शब्दाः भिन्नाः भिन्नाः एव"।**

सूत्रे विद्यमानस्य वचनपदस्यापि सामान्यरूपेणात्र चर्चा विधीयते वचनम् -संज्ञा, संख्या - संज्ञी किन्तु पाचीनाः एवमेव संख्यायाः कृते एवमेव व्यवहारं कुर्वन्ति। तेन वचनपदेन संख्यारूपोऽर्थो ज्ञातव्यः। अन्यत्र प्रतिपदिकापेक्षया लिङ्गस्य, परिमाणस्य वा आधिक्येन भानं भवति किन्तु एकः, द्वौ, बहवः इत्यादौ एकत्व, द्वित्व बहुत्वसंख्यायाः नियतोपस्थितिकत्वेन प्रातिपदिकार्थः एव तेन न संख्याधिक्ये प्रथमा इति दीक्षितेन उक्तम्। ननु उक्तार्थानामप्रयोगः इति नियमात् एकत्वादिसङ्ख्यायाः प्रातिपदिकार्थत्वेन उक्तत्वात् पुनः वचनमात्रे किमर्थम् ? यदि प्रातिपदिकार्थे विधियते चेत् तत्रापि सङ्ख्याया एव बोधः। अत्र प्रकृत्या एव एकत्वादिसङ्ख्या उक्ता एव। अतः न्यास्यस्य अनित्यत्वं ज्ञाप्यते। द्वि-बहु–आदिशब्देभ्यः न स्वादिप्रत्ययः न वा द्विशब्दात् जस् एवं बहुशब्दाद्वा औ, अनन्वितविभक्त्यपेक्षया अनुवादकस्य न्याय्यत्वात् द्वौ, बहवः इत्यादौ प्रकृतिः या संख्या वदति सैव संङ्ख्या प्रत्ययोऽनुवदति (कण्डेल, २०७४,

पृ. ११)। एक: द्वौ, प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति तेन द्विशब्दात् द्वित्वविशिष्टस्य अर्थस्य बोधात् तत्र न सुप्रत्यय:।

## सूत्रस्य खण्डनप्रकरणम्

महाभाष्यदिशा स्वयमेव दीक्षित: सूत्रस्य खण्डनमपि विदधाति मनोरमाग्रन्थे। वस्तुत: अर्थे लिङ्गे च प्रथमा इत्येव सूत्रमस्तु अन्यत् सर्वं त्याज्यम् । अत्र न्यासे अर्थशब्दस्तावत् वृत्तिबिषयपक:, शक्तिविषय: प्रातिपदिकनिष्ठशक्तिविषय: इति यावत् अत्र सामन्यत: त्रिकं प्रातिपदिकमिति पक्षस्याश्रयणमस्ति । अत्र नैयत्येन जायतेऽकाङ्क्षा कस्यार्थे इति? यस्माद् स्वादयो विधीयन्ते इति। स्वादयस्तावत् प्रातिपदिकाल्लिङ्गप्रत्ययविशिष्टाच्च भवन्ति । प्रातिपदिकस्योऽर्थ: तस्मात् स्वादय: जायन्ते। यथा न्यासपक्षे इदपमि फलति मृडानी, हिमानी इत्यादीमपि सुतरां ग्रहणं भविष्यति । यतो हि स्वादिप्रत्ययानां प्रकृति: हिमानी, मृडानी इत्यादि अत्रापि अत्र पुंगोगमहत्त्वादिकमपि नियतोपस्थितिक: । न्यासपक्षेऽपूर्वोऽयम् । यथाश्रुतपक्षे तु प्रातिपदिकग्रहणेन प्रवृत्तिनिमित्ततदाश्रयस्य ग्रहणं भवति पुंयोगमहत्वादीनामाधिक्येन भानात् प्रथमा नैव प्राप्ता । यत्र यत्र हिमानी शब्दप्रयोग: तत्र तत्र महत्त्वस्य नैयत्येनोपस्थितिर्भवति ।अत्र अर्थ: = शक्तिविषय: अर्थात् प्रातिपदिकनिष्ठशक्तिविषयोऽर्थ: तेन लिङ्गमपि प्रातिपदिकनिष्ठशक्तिविषय: अत: लिङ्गग्रहणमपि न कर्तव्यम् । अपदं न प्रयुञ्जीत, अर्थात् अपरिनिष्ठितम् अप्रयोज्यम् । अनुकरणे तु स्वादीनां प्रकृतित्वमेव नास्ति तेन स्वादिं विनैव तेषां साधुत्वमिति। यथा भू सत्तायाम् इति।

## निष्कर्ष:

अत्र व्याख्याने प्रातिपदिकार्थलिङ्गपरिमाणमात्रे प्रथमा इति सूत्रस्य विषये तत्रापि दीक्षितेन स्वकीयायां वैयाकरणसिद्धान्तकोमुद्यां 'परिमाणे किम् द्रोणो व्रीहि'रिति यदुक्तं तस्यैव वाक्यस्य पर्य्यालोचनमत्र विहितमस्ति। परिमाणग्रहणसामर्थ्यात् द्रोणशब्दात्परिमाणेऽर्थे सुप्रत्ययस्य विधानं भवति ततः तस्य च विशेषपरिमाणस्य समान्यपरिमाणेऽभेदेनान्वयो भवति तस्य च पुनः परिच्छेद्यपरिच्छेदकभावेन व्रीहा भवति अन्वयः तेन द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरिति दीक्षिताभिप्रायः। तत्रैव नागेशस्तु कृतेऽपि परिमाणग्रहणेऽत्र प्रातिपदिकार्थ एव प्रथमायाः विधानं भवति। तथा परिच्छेद्यपरिच्छेदकयोरैक्याभावाद् द्रोणशब्दस्य द्रोणपरिमिते लक्षणा विधीयते तेन द्रोणपिरिमितो व्रीहिरिति शाब्दबोधो भवति। तथा च शक्यतावच्छेदकारोपरूपायाः लक्षणाया अपि निरूपणमत्र विद्यते। यत्र दीक्षितनागेशयोः मतसमीक्षणेन विज्ञायते द्वयोर्मध्ये नागेशस्यैवाभिमतं ग्राह्यमिति। तत्र च भाष्यमपि प्रमाणं भवति। एवमेव अग्रेऽपि वदति नागेशः परिमाणार्थे प्रथमा विधीयते चेत् 'तिङ्समानाधिरणे प्रथमा' इति वार्तिकेन सह विरोधो भवति। यत्र च तिङ्वाच्यकारकवाचित्वं भवति तत्रैव प्रथमा विधीयते। यथा घट: अस्ति इत्यादौ तिङ् = ति, तद्वाच्यं कारकं कर्तेति, तद्वाचित्वमेव घटपदोत्तर सुप्रत्ययस्य अर्थ: तेन प्रथमा विधीयते। अत्रापि तिङ्समानाधिकरणं स्पष्टमेव विद्यते। तेन द्रोण: अस्ति इत्यत्र तथा नास्ति अत्र दीक्षितेन परिमाणार्थे सुविहित: अत: तङ्वाच्यकारकवाचित्वं नास्तीति तेन प्रथमा न। अत: प्रातिपदिकार्थे एव सुप्रत्ययो भवति तेन भवत्येव सारल्येन शाब्दबोध नापत्तिरिति दिक्।

## कृतज्ञताज्ञापनम्

अस्मिन् शोधपत्रे विशेषरूपेण शेखरमनोरमाग्रन्थदिशा प्रातिपदिकार्थसूत्रस्थस्य परिमाणग्रहणस्य विषये चर्चा विहिता विद्यते। अत्रानुसन्धानकार्यस्य शास्त्रीयविषये, लेखगतप्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं

विनिवेदयामि । अथ च लेखमिदमाद्यन्तं सूक्ष्मेक्षिकया सम्परीक्ष्य यथावश्यकं परामर्शदातृभ्यो गुरुभ्योऽपि हार्दिकीं कृतज्ञतां व्यनज्मि ।

## सन्दर्भग्रन्थाः

उपाध्यायः, सभापतिः (सन् १९६६) वैयाकरणसिद्धान्तकौमुदी, मोतिलालवनारसीदासः ।

आचार्यः, सुदर्शनः (२०७३) व्युत्पत्तिवादः, वाणीविलासप्रकाशनम् ।

कण्डेल, भीमप्रसादः (२०७४) लघुशब्देन्दुशेखरः, नमस्ते–नेपाल–प्रेस–प्रालि ।

चतुर्वेदः, गिरिधरः शर्मा (सन् २०१२) वैयाकरणसिद्धान्तकौमुदी. मोतिलालवनारसीदासः ।

त्रिपाठी, जयशंकरलालः (२०७०) व्याकरणमहाभाष्यम्, चौखम्बा–कृष्णदास–अकादमी ।

द्विवेदी, शशिकान्तः (सन् २०१६) अष्टाध्यायीसूत्रपाठः, शारदासंस्कृतसंस्थानम् ।

मिश्रः, आद्यप्रसादः. (सन् २०७३) वैयाकरणभूषणसारः, सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः।

मिश्रः, वंशीधरः (सन् २००६) परमलघुमञ्जूषा, चौखम्बाविद्याभवनम् ।

मिश्रः, राममनोहरः (वि.सं २०४०) भूषणसार–परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा, सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः ।

शास्त्री, वैकुण्ठनाथः (सन् २०१६) लघुशब्देन्दुशेखरः, चौखम्बासुरभारतीप्रकाशनम् ।